**दिनाङ्क :- 25.05.2026**

**प्रातः - 06:55**

**<u>अथ वार्ताः</u>**

**<u>जयशंकर-रुबियो-संवादः</u>**

नवदिल्ल्यां विदेशमन्त्री डॉ. सुब्रह्मण्यम्-जयशंकरः अमेरिका-देशीयः विदेश-मन्त्री मार्को-रुबियो च विभिन्नेषु विषयेषु सविस्तरं चर्चितवन्तौ। उभौ नेतारौ भारतामेरिका-रणनैतिक-सहभागितां भूयः अपि द्रढयितुं स्व-स्व-प्रतिबद्धतां पुनः उदीरितवन्तौ। ताभ्यां उक्तं यत् एषा सहभागिता व्यापारोर्जा-गतिशीलता-क्षेत्रीयसुरक्षादि-क्षेत्रेषु विशेषतः अस्ति। डॉ. जयशंकरः अवदत् यत् भारतस्य अमेरिका-देशेन सह व्यापकः वैश्विकः रणनैतिक-सहभागित्व-सम्बन्धः अस्ति, यः गहन-सहयोगाधृतः अस्ति। सः उक्तवान् यत् उभयोः देशयोः सम्बन्धाः सम्पूर्णविश्वे प्रभावं जनयन्ति, अपि च अनेकेषु क्षेत्रेषु तयोः हितानि समानानि सन्ति। विदेशमन्त्री उक्तवान् यत् एषा वर्तमानचर्चा कठिन-वैश्विक-परिस्थितिषु अभवत्, परञ्च मुक्तमनसा सार्थका चर्चाभवत् इति तस्य विश्वासः अस्ति। सः उक्तवान् यत् उभयोः देशयोः मध्ये व्यापारसन्धेः निर्णायक-रूपेण निर्धारणम् अचिरमेव भवेत् इति आवश्यकम् अस्ति। तेन ऊर्जाव्यापारे जातः विस्तारः अभिनन्दितः, अपि च उक्तम् यत् विविधेभ्यः स्रोतेभ्यः ऊर्जायाः आपूर्तिः भारतस्य ऊर्जा-सुरक्षायै अत्यावश्यकी वर्तते।

श्रीरूबियो उक्तवान् यत् उभौ देशौ आतङ्कवाद-कारणात् कष्टम् अनुभूतवन्तौ। भारतम् अमेरिका च तेषु सर्वेषु प्रमुखविषयेषु रणनैतिक-रूपेण एकमतौ स्तः ये नूतन-शताब्दीं परिभाषयिष्यन्ति। ध्यानास्पदम् अस्ति यत् अमेरिकादेशीयः विदेशमन्त्री मार्को-रुबियो चतुर्दिवसीय-यात्रा-प्रसंगे सम्प्रति भारते अस्ति। सः अस्य

मासस्य षड्विंशति-दिनाङ्के अर्थात् श्वः क्वाड्-विदेशमन्त्रिणां सम्मेलने सहभागं करिष्यति।

=========================

**<u>पश्चिमबङ्गालः</u>**

पश्चिमबङ्गाल-राज्ये, भारतीय-जनता-पार्टीति-दलस्य प्रत्याशी देबाङ्ग्शु-पाण्डा फाल्टा-विधानसभाक्षेत्रस्य पुनर्निर्वाचने सुमहद्-विजयम् अवाप्नोत्। श्रीपाण्डा एकविंशत्यधिक-नवसहस्रोत्तरैकलक्ष-मतैः भारतीय-साम्यवादि-मार्क्सवादि-दलस्य शम्भुनाथ-कुर्मिणं पराजितवान्। तत्र काङ्ग्रेस्-दलस्य अब्दुर-रज्जाक-मोल्लाहः तृतीये स्थाने आसीत्। अपरतः, तृणमूल्-काङ्ग्रेस्-दलस्य प्रत्याशी जहाङ्गीर-खानः चतुर्थस्थाने अवर्तत। पश्चिमबङ्ग-विधानसभा-निर्वाचनस्य मतदानकाले बृहत्स्तरे दुराचारस्य आरोपस्य अनन्तरं निर्वाचनायोगः फाल्टा-नगरे पुनः मतदानस्य आदेशं प्रदत्तवान्। अस्मिन् मासे एकविंशति-दिनाङ्के पुनः मतदानम् अभवत्।

=========================

**<u>राष्ट्रपतिः/पद्मपुरस्काराः</u>**

राष्ट्रपतिः द्रौपदी-मुर्मूः अद्य राष्ट्रपति-भवने षड्विंशत्यधिक-द्विसहस्रतमाब्दस्य प्रथमे नागरिकालङ्करण-समारोहे षट्षष्टि-पद्म-पुरस्कारान् प्रदास्यति। अत्र उपराष्ट्रपतिः सी.पी.राधाकृष्णन्, प्रधानमन्त्री नरेन्द्र-मोदी, केन्द्रीयः गृहमन्त्री अमितशाहः अन्ये च सम्मान्यजनाः उपस्थिताः भविष्यन्ति।

=========================

**<u>ऋतुः</u>**

देशस्य मध्योत्तर-पश्चिमीय-दिग्विभागेषु अतिताप-कारणात् जनजीवनं पर्याकुलितं जातम्। अत्र क्षेत्रेषु प्रायः समाना एव स्थितिः आगामिभ्यः षड्-दिवसेभ्यः प्रवर्तिष्यते इति भारतीयर्तु-विभागेन सूचितम्।

=========================

**क्रिकेट्**

आई.पी.एल्.-क्रिकेट्-स्पर्धा-मालिकायां, गतरात्रौ कोलकातायाः ईडन्-गार्डन्स्-क्रीडाङ्गणे दिल्ली-कैपिटल्स्-दलेन कोलकाता-नाइट्-राईडर्स्-दलं चत्वारिंशद्-धावनाङ्कैः पराजितम्। विजेतृ-दलेन चतुरधिक-द्विशत-धावनाङ्कानां विजयलक्ष्यं स्थापितम् आसीत्। परन्तु कोलकाता-दलं त्रिषष्ट्यधिक-शतं धावनाङ्कान् एव अर्जितुम् अपारयत्। कुलदीप-यादवः स्पर्धा-पुरुषः घोषितः। ततः पूर्वम्, अपराह्णे मुम्बय्यां वानखेडे-क्रीडाङ्गणे आयोजिते द्वन्द्वे राजस्थान-रॉयल्स्-दलेन आतिथेयं मुम्बई-इण्डियन्स्-दल त्रिंशद्-धावनाङ्कैः पराजितम्। विजेतृ-दलेन पञ्चाधिक-द्विशत-धावनाङ्कानां विजयलक्ष्यं स्थापितम्।

=========================